तं मुष्टिभिर्विनिघ्नन्तं वज्रसारैरधोक्षजः ।

करेण कर्णमूलेऽहन् यथा त्वाष्ट्रं मरुत्पतिः ॥ २५ ॥

स आहतो विश्वजिता ह्यवज्ञया

परिभ्रमद्गात्र उदस्तलोचनः ।

विशीर्णबाह्वङ्घ्रिशिरोरुहोऽपतद्

यथा नगेन्द्रो लुलितो नभस्वता ॥ २६ ॥

क्षितौ शयानं तमकुण्ठवर्चसं

करालदंष्ट्रं परिदष्टदच्छदम् ।

अजादयो वीक्ष्य शशंसुरागता

अहो इमां को नु लभेत संस्थितिम् ॥ २७ ॥

यं योगिनो योगसमाधिना रहो

ध्यायन्ति लिङ्गादसतो मुमुक्षया ।

तस्यैष दैत्यऋषभः पदाहतो

मुखं प्रपश्यंस्तनुमुत्ससर्ज ह ॥ २८ ॥